# संस्कृत वार्ता:

दिनाङ्क : 13.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य फ्रांस-स्लोवाकिया-देशयोः षड्दिवसीय-यात्रायै प्रस्थितः । तेनोक्तं यत्, इयं यात्रा फ्रांस-देशेन सह आर्थिक-सांस्कृतिक-सम्बन्धान्, स्लोवाकिया-देशेन च सह द्विपक्षीय-सम्बन्धान् सुदृढीकर्तुं केन्द्रिता भविष्यति।
- प्रधानमन्त्री नरेन्द्रमोदी फ्रांस-देशस्य एवियन-नगरे आयोज्यमाने जी-७ शिखर-सम्मेलने अपि भागं भजिष्यति ।
- केन्द्रीय-गृहमन्त्री अमित-शाहः सीमवर्ती-जनपदेषु जनसाङ्ख्यिकीय-परिवर्तनविषये उच्चस्तरीयोपवेशनस्य आध्यक्षम् अकरोत् ।
- असमस्य जोरहाट-वायुसेना-केन्द्रे भारतीय-वायुसेनायाः एन्-32- विमानम् दुर्घटनाग्रस्तो जातम्।
- धर्मशालायां भारत-अफगानिस्तान-देशयोः मध्ये प्रथम-एकदिवसीय-क्रीडायां पणकं विजित्य भारतेन प्रथमं कन्दुक-क्षेपणं स्वीकृतम्।

---

<u>प्रधानमन्त्री-यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य फ्रांस-स्लोवाकिया-देशयोः षड्दिवसीय-यात्रायै प्रस्थितः। गमनात् प्राक् प्रदत्ते एकस्मिन् वक्तव्ये तेन प्रोक्तं यत्, भारतस्य रणनीतिक-दृष्टिकोणे फ्रांस-देशस्य विशिष्टस्थानं वर्तते। तेनोक्तं यत् अस्याः यात्रायाः मुख्यलक्ष्यं भारत-फ्रांसदेशयोः आर्थिक-सांस्कृतिक-सम्बन्धानां सुदृढीकरणम् इत्यस्ति । भारतीय-समयानुसारं रात्रौ सार्ध-दशवादने प्रधानमन्त्री फ्रांस-देशस्य नीस-नगरं प्राप्स्यति। प्रधानमन्त्रिणः आगमनात् पूर्वमेव नीस-नगरे स्थितैः प्रवासी-भारतीय-समुदायस्य सदस्यैः , नवोद्योग-संस्थापकैः , उद्योगपतिभिश्च महान् उत्साहः प्रदर्शितः । अत्राशास्यते यत् इयं यात्रा यूरोपेन सह भारतस्य सम्बन्धान् दृढीकरिष्यति ।

अस्माकं वार्ताहरेण सूचितं यत् प्रधानमन्त्रिणः स्वागतीकर्तुं तत्र महत्यः सज्जाः विहिताः, प्रवासी-भारतीयाश्च प्रधानमन्त्रिणा सह संवादं कर्तुम् उत्सुकाः सन्ति। अद्यत्वे प्रायः दशसहस्र-भारतीयछात्राः फ्रांसदेशे अध्ययनरताः सन्ति सहैव उभावपि देशौ त्रिंशदधिक-द्विसहस्रपर्यन्तं एतां संख्यां त्रिंशत्-सहस्रं यावत् प्रापयितुं कार्यरतौ वर्तेते। फ्रांसदेशेन अष्टादश-वर्षतः पञ्चत्रिंशत्-वर्ष-पर्यन्तानाम् आयुवर्गीयाणां कृते पञ्चवर्षीय-शेंगेन-वीसा सहैव द्विवर्षीय-शिक्षापरक-कार्यानुमतिः एवमेव युवा-व्यावसायिक-योजनायाश्च नवीन-द्वाराणि उद्घाटितानि । आकाशवाण्या सह संवादे फ्रांस-देशे नियुक्तः भारतस्य राजदूतः श्रीसञ्जीव-साङ्गला इत्यसौ सबलं प्रोक्तवान् यत्, प्रधानमन्त्रिणः इयं यात्रा उभयदेशयोः जनानां पारस्परिक-सम्बन्धान् द्रढयिष्यति। अत्रान्तरे प्रधानमन्त्रिणा प्रोक्तं यत् तस्य इयं ऐतिहासिक-स्लोवाकिया-यात्रा द्विपक्षीय-सम्बन्धान् प्रबलीकरिष्यति । यात्रावधौ प्रधानमन्त्री स्लोवाकिया-देशस्य नेतृभिः सह प्रमुख-क्षेत्रेषु सहयोगं वर्धयितुम् उच्च स्तरीय-चर्चाम् अपि विधास्यति। स्लोवाकिया-यात्रां समाप्य प्रधानमन्त्री नरेन्द्र-मोदी अस्य मासस्य षोडशे सप्तदशे च दिनाङ्के आयोज्यमाने जी-7 शिखर-सम्मेलने भागं ग्रहीतुं पुनः फ्रांसदेशं गमिष्यति । प्रधानमन्त्रिणा स्पष्टीकृतं यत् जी-7 सम्मेलने भारतस्य इयम् उपस्थितिः वैश्विक-पटले देशस्य वर्धमानं गौरवं तथा च अन्यदेशानां भारतमालक्ष्य दृढविश्वासं प्रदर्शयति; तेन एतदपि प्रोक्तं यत् भारतं निरन्तरं अष्टमवारं जी-7 सम्मेलने आमन्त्रितम् ।

अन्ततः, प्रधानमन्त्री जून-मासस्य अष्टम-दिनाङ्के पेरिस-नगरे स्वयात्रां समापयिष्यति, यत्र सः फ्रांस-देशस्य राष्ट्रपतिना इमैनुएल-मैक्रॉन इत्यमुना सह विवा-टैक-षड्विंशत्यधिक-द्विसहस्रतमे भागं भजिष्यति ।

---

<u>अमित शाह बैठक</u>

गृहमंत्री अमित शाह: अद्य जनसंख्या-परिवर्तनम् अधिकृत्य सभाया: अध्यक्षतां अकरोत्। अपि च जनसंख्या आयोगं निर्दिष्टवान् यत् सीमवर्ती-जनपदेषु जनसंख्याया: परिवर्तन-विषये अध्ययनं कुर्यात्। सभायां श्रीशाह: आयोगं परिस्थिते: समीक्षार्थं आदेशं प्रदत्तवान्। विगतमासे केन्द्र

प्रशासनेन अवैध प्रवासने अन्य-असामान्यकारणैः च जनसंख्यायां परिवर्तन-विषये अध्ययनार्थं उच्चस्तरीय समीतेः गठनं कृतम्।

---------------------------------------------

## विमानदुर्घटना

भारतीय वायु सेनया असमराज्यस्य जोरहाट-क्षेत्रे अद्य प्रातः ए.एन. 32- विमानदुर्घटनायां पञ्च वायुसैनिकानां निधने शोकः प्रकटितः। एकस्मिन् सामाजिक पटले प्रकाशिते संदेशे भारतीय वायुसेनया सूचितं यत् स्कवाड्रन लीडर-प्रशांतसिंहः, फ्लाइट्-लेफ्टिनेन्ट-शुभम् कुमारः, सार्जेन्ट जितेन्द्र शर्मा अग्निवीरः वायु-खेमा राम कुमावतः, अग्निवीरः वायु-दानिश आलम् च अस्यां विमानदुर्घटनायां पञ्चतत्वेः विलीनाः। वायुसेना शोक-संतप्त परिवाराणां प्रति संवेदनां प्रकटितवती। रक्षामंत्री राजनाथ सिंहः ए.एन.32 विमानदुर्घटनायां पञ्च-वायु-सैनिकानां निधने शोकं प्रकटितवान्।

---------------------------------------------

## देहरादून-सञ्चलनम्

उत्तराखण्डस्य देहरादून-स्थितायां भारतीय-सैन्य-अकादम्याम् अष्टपञ्चाशदधिकैकशततमं दीक्षान्त-सञ्चलनम् अतीव वैभवेन आयोजितम्। भारतीय-सेनायाः शौर्य-परम्परायां अद्य एकाशीत्यधिक-चतुश्शतं नूतनाः युवाधिकारिणः सम्मिलिताः अभवन्। अत्रावसरे राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः समीक्षा-अधिकारित्वेन अस्य भव्य-सञ्चलनस्य निरीक्षणं अकरोत् । अयमुत्सवः छात्र-सैनिकानां कठोर-सैन्य-प्रशिक्षणस्य सफलतापूर्वकं समापनस्य प्रतीकमासीत् । दीक्षान्त-समारोहे युवाधिकारिणः अनुकरणीय-अनुशासनं, निष्ठां, सैन्य-भावनां च प्रदर्श्य अतीव सुस्पष्टं सञ्चलनं कृतवन्तः।

अकादम्याः इतिहासे महिला-छात्र-सैनिकानां दीक्षान्त-समारोहं विशिष्ट-कीर्तिमानत्वेन वर्णयन्ती राष्ट्रपतिः अवदत् यत्, इदं देशे महिला-नेतृत्व-युतस्य विकासस्य दिशि प्रेरणास्पदमस्ति।

श्रीमति मुर्मुः युवा-अधिकारिणः प्रबोधितवती यत् ते जीवने निरन्तरं शिक्षार्थिनः भवेयुः, साहसिक-निर्णयान् स्वीकुर्युः, सहैव सुरक्षा-समाह्वानानि सम्मुखीकुर्वन्तः नैतिक-नेतृत्वस्य प्रदर्शनं कुर्युः।

---

## राजनाथ-दीक्षान्तः

रक्षामन्त्रिणा राजनाथ-सिंहेन अद्य नूतन-नियुक्तेभ्यः भारतीय-वायुसेनायाः अधिकारिभ्यः प्रबोधितं यत्, परिवर्तिते सुरक्षा-वातावरणे तैः ड्रोन-विमानानां उपग्रहाणां रोबोटिक्स-सदृशाणां युद्ध-प्रविधीनां प्रयोगो विधेयः । सः अद्य हैदराबाद-नगरस्य डुंडिगल-स्थितायां वायुसेना-अकादम्याम् सप्तदशोत्तर-द्विशततमस्य संयुक्त-दीक्षान्त-सञ्चलनस्य निरीक्षणं कुर्वन्नासीत् । तेनोदीरितं यत् आधुनिक-युद्ध-पद्धतौ बहूनि परिवर्तनानि जातानि, अतः अधिकारिभिः नवीन-युद्ध-प्रणालीभिः रणनीतिभिश्च सह निरन्तरं स्वज्ञानं परिष्करणीयम्।

अत्रावसरे रक्षामन्त्रिणा राष्ट्रिय-रक्षा-अकादम्यां प्रशिक्षिताः महिला-छात्रसैनिकानां प्रथम-गणः अपि वायुसेनायाम् औपचारिकरूपेण नियुक्तः । एताः महिलाः गते वर्षे एन.डी.ए. इत्यतः उत्तीर्णाः भूत्वा शाखा-विशिष्ट-प्रशिक्षणार्थं वायुसेना-अकादम्यां प्रविष्टवत्यः । अस्मिन् दीक्षान्त-समारोहे सुखोई-३० एम.के.आई.-विमानैः, सारङ्ग-उदग्रयानैः, सहैव सूर्यकिरण- वैमानिकैश्च अद्भुताः आकाशीय-क्रीडाः प्रदर्शिताः। अस्मिन् भव्य-आयोजने रक्षा-बलात् विभिन्न-विभागानां वरिष्ठाधिकारिणः उपस्थिताः आसन्।

---

## क्रिकेट

भारत-अफगानिस्तान-देशयोः मध्ये प्रथम-एकदिवसीय-क्रीडा धर्मशालायां प्रवर्तते। आदौ पणकं विजित्य भारतेन प्रथमं कन्दुक-क्षेपणं स्वीकृतम्। अंतिम वार्ता लेखन समयम् यावत् अफगानिस्तानेन.............क्षेप चक्रेषु ................. क्रीडकाणां हानौ............... धावनांकाः रचिताः।

।। इति वार्ता: ।।